# U.G. 3rd Semester Examination - 2025

## SANSKRIT

## [MAJOR]

## Course Code : SANS-H-MJ-T-03

## [NEP-2020]

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. संस्कृतेन देवनागरीलिप्या च यथारुचि **दश** प्रश्नाः समाधेयाः।

2×10=20

i) अभिज्ञानशकुन्तलम् इति दृश्यकाव्यस्य नान्दीश्लोकं लिखत।

ii) अभिज्ञानशकुन्तलम् इति दृश्यकाव्ये कति अङ्काः सन्ति? अस्य काव्यस्य टीकाकारः कः?

iii) 'ततो गण्डस्योपरि पिण्डकः संवृत्तः' — एतद् वचनं कः किमर्थ उक्तवान्?

iv) मृगानुसरन्तं राजानं दृष्ट्वा सारथिः कस्य देवस्य चिन्तां कृतवान्?

v) सानुमती दुष्यन्तस्य प्रमोदवनं किमर्थं प्रविष्टवती?

vi) काश्यपः शकुन्तलायाः विवाहवृत्तान्तं कथं ज्ञातवान्?

vii) वृक्षदेवताः शकुन्तलायै कीदृशानि उपहाराणि अददुः?

viii) तपस्विनः राज्ञे कीदृशं करं ददति?

ix) स्वप्नवासवदत्तम् इति दृश्यकाव्यस्य चतुर्णां पुरुषपात्राणां नामानि लिख्यताम्।

x) विरचिका का आसीत्?

xi) स्वप्नवासवदत्तदृश्यकाव्ये विदूषकस्य नाम किम्?

[Turn over]

xii) भासस्य स्वप्नवासवदत्तदृश्यकाव्यस्य उपजीव्यं किमस्ति?

xiii) ब्रह्मचारी किमर्थं लावाणकग्रामे वसति स्म?

xiv) 'पञ्चेषुर्मदनो यदा कथमयं षष्ठ: शर: पतित:' — एतत् वचनं क: उक्तवान्? मदनस्य पञ्च बाणानां नामानि लिखनीयानि।

xv) का घोषवती? कुत: सा संप्राप्ता?

2. यथामति सुरगिरा वङ्गभाषया आङ्गलभाषया वा **चत्वार:** प्रश्ना: समाधेया: 5×4=20

i) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवाद: कार्य:।

a) यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदन्तर्विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयों—
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्।।

b) यात्येकतोऽस्तशिखरं पतिरोषधीना—
माविष्कृतोऽरुणपुर:सर एकतोऽर्क:।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु।।

ii) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवाद: कार्य:।

a) खगा वासोपेता:सलिलमवगाढो मुनिजन:
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशाति शनैरस्तशिखरम्।।

b) दु:खं त्यक्तुं बद्धमूलोऽनुराग:
स्मृत्वा स्मृत्वा याति दु:खं नवत्वम्।।
यात्रा त्वेषा यद् विमुच्येह वाष्पं
प्राप्तानृण्या याति बुद्धिं प्रसादम्।।



iii) शार्ङ्गरव: शारद्वत: च कौ: नाटके तयो: स्थानं निरुप्यताम्।

iv) अभिज्ञानशकुन्तलदृश्यकाव्ये भ्रमरवृत्तान्तस्य नाटकीयतात्पर्यं विवृणुत।

v) यौगन्धरायण: किमर्थं स्वभगिनी-परिचयेन वासवदत्तां पद्मावत्या: समीपे किञ्चित्कालं गच्छितुमैच्छत्?

3. यथानिर्दिष्टं समाधेयम्— 10×2=20

i) यथेच्छ**मेकस्य** सुरगिरा देवनागरीलिप्या च सप्रसङ्ग व्याख्या कार्या 6×1=6

इदं किलाव्याजमनोहरं वपुस्तप:क्षमं साधुयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।।

**अथवा**

नैवेदानीं दु:खिताश्चक्रवाका:
नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ता:।
धन्या सा स्त्री यां तथा वेत्ति भर्त्ता
भर्तृस्नेहात् सा हि दग्धाप्यदग्धा।।

ii) यथेच्छ**मेकस्या:** पङ्क्ते: भावसम्प्रसारणं, सरलसुरगिरा देवनागरीलिप्या च कार्यम्। 4×1=4

अर्थो हि कन्या परकीय एव।

**अथवा**

प्रद्वेषो बहुमानो वा संकल्पादुपजायते।

iii) यथेच्छं **एक:** प्रश्न: समाधेय:। 10×1=10

a) कण्वाश्रमात् शकुन्तलाया: पतिगृहनामनदृश्यं स्वभाषया वर्णनीयम्।

b) अभिज्ञानशकुन्तलम् इति दृश्यकाव्यस्य सप्तमाङ्के दुष्यन्त-शकुन्तलयोः पुनर्मिलनं कथं संघटते? नाटके तस्य महत्त्वं किम्?

c) स्वप्नवासवदत्तनाटके यौगन्धरायणस्य राजनीतिज्ञाननैपुण्यं यथा प्रतिफलितं तद् आलोच्यताम्।

---